# ३२. शुभयात्रा

वासराः
भविष्यत्

पत्नी - सोमवासरे प्रत्यागमिष्यति खलु ?

पतिः - आम्, सोमवासरे प्रातः आगमिष्यामि । रविवासरे मम स्नेहितः सकुटुम्बम् आगमिष्यति ।

पत्नी - पुत्रः सुनीलः शनिवासरे सायं चेन्नै गमिष्यति इति ।

पतिः - भवतु, मङ्गलवासरे विवाहः अस्ति । अहं सोमवासरे प्रातः आगमिष्यामि खलु, सायं मिलित्वा विपणिं गमिष्यामः । मम स्नेहितमपि सूचयतु ।

पत्नी - अहो ! अस्मिन् सप्ताहे बहु कार्यक्रमाः सन्ति । बुधवासरे रजन्याः विद्यालये वार्षिकोत्सवः । कार्यक्रमे तस्य भरतनाट्यम् अस्ति ।

पतिः - चिन्तां मा करोतु भवती । तत्रापि गच्छामः । गुरुवासरे पूर्णतया विश्रान्तिः ।

पत्नी - नास्ति भोः ! गुरुवासरे प्रतिवेशिन्याः गृहे कोऽपि विशेषः अस्ति । सा भोजनार्थमेव आहूतवती ।

पतिः - भवतु, अन्यत् सर्वम् अनन्तरं चिन्तयिष्यामः । अहं तु इदानीं गच्छामि ।

पत्नी - भवतः प्रयाणं सुखकरं भवतु ।

पतिः - अयि । 'शुभास्ते पन्थानः सन्तु' इति कालिदास-वचनं वदतु ।

पत्नी - भवान् कालिदासः नैव खलु ?